**PAPER CODE - UGNYDS604**

**PAPER NAME - वेदान्तसारः**

## Unit - 1

**लघूत्तरीयप्रश्नाः (1×12)**

1. वेदान्तसारस्य रचयिता कः?

2. वेदान्तो नाम किम् ?

3. वेदान्तसारे कति अनुबन्धाः सन्ति?

4. वेदान्तशास्त्रस्य अधिकारी कः?

5. साधनचतुष्टयस्य नामानि कानि?

6. 'नित्यानित्यवस्तुविवेकः' इति कः?

7. 'शमः' इत्यनेन किं ज्ञायते?

8. 'दमः' इत्यस्य लक्षणं किम्?

9. 'उपरतिः' नाम का?

10. का नाम तितिक्षा?

11. 'समाधानं' किम् उच्यते?

12. वेदान्तसारस्य विषयः कः?

**टिप्पणी - (6×7)**

1. अनुबन्धचतुष्टयम् (वेदान्तसारदृष्ट्या)

2. साधनचतुष्टयसम्पत्तिः

3. नित्यानित्यवस्तुविवेकः

4. शमदमादिषट्कसम्पत्तिः

5. मुमुक्षुत्वम्

6. अज्ञानस्य लक्षणम् (सदसद्भ्याम् अनिर्वचनीयत्वम्)

7. अज्ञानस्य आवरणशक्तिः

**दीर्घोत्तरीयप्रश्नाः (10×6)**

1. वेदान्तसारानुसारं 'वेदान्त' इत्यस्य लक्षणं किम्? ग्रन्थस्य प्रतिपाद्यविषयस्य संक्षेपेण विवेचनं कुरुत।

2. वेदान्तशास्त्रस्य 'अनुबन्धचतुष्टयं' सविस्तरं व्याख्यात।

3. "साधनचतुष्टयसम्पन्नः प्रमाता अधिकारी" - एतस्य वाक्यस्य आधारेण अधिकारिणः लक्षणं स्वरूपं च विशदयत।

4. 'शमदमादिषट्कसम्पत्तिः' का? मुमुक्षोः कृते एतेषां किं महत्त्वम्?

5. वेदान्तसारे वर्णितस्य 'अज्ञानस्य' स्वरूपं 'सदसद्भ्यामनिर्वचनीयम्' इति कथं सिद्धं भवति? सोदाहरणं लिखत।

6. अज्ञानस्य आवरण-विक्षेपशक्त्योः सविस्तरं विवेचनं कुरुत।

## Unit - 2

**लघूत्तरीयप्रश्नाः (1×12)**

1. अज्ञानस्य लक्षणं किम्?

2. अज्ञानं कतिविधं भवति?

3. अज्ञानस्य कति शक्तयः सन्ति ?

4. 'आवरणशक्तिः' का?

5. 'विक्षेपशक्तिः' का?

6. अज्ञानस्य समष्ट्युपहितं चैतन्यं किं कथ्यते?

7. अज्ञानस्य व्यष्ट्युपहितं चैतन्यं किं कथ्यते?

8. 'अध्यारोपः' कः?

9. 'अपवादः' कः?

10. सूक्ष्मशरीरं कति अवयवात्मकं भवति?

11. सूक्ष्मशरीरस्य के के अवयवाः सन्ति?

12. पञ्चकोशानां नामानि क्रमेण लिखत।

**टिप्पणी - (6×7)**

1. अज्ञानस्य विक्षेपशक्तिः

2. ईश्वरः (अज्ञानसमष्ट्युपहितं चैतन्यम्)

3. प्राज्ञः (अज्ञानव्यष्ट्युपहितं चैतन्यम्)

4. अध्यारोपः (वस्तुन्यवस्त्वारोपः)

5. अपवादः (प्रपञ्चप्रविलापनम्)

6. सप्तदशावयवात्मकं सूक्ष्मशरीरम्

7. पञ्चकोशाः

**दीर्घोत्तरीयप्रश्नाः (10×6)**

1. 'अध्यारोप' इति कः? वस्तुन्यवस्त्वारोपस्य प्रक्रियायां रज्जुसर्पस्य दृष्टान्तं स्पष्टीकुरुत।

2. अज्ञानस्य 'समष्टि-व्यष्टि' विचारं चैतन्यस्य ईश्वर-प्राज्ञ-रूपैः सह स्पष्टं कुरुत।

3. पञ्चीकरणप्रक्रिया का? सूक्ष्मभूतेभ्यः स्थूलभूतानां उत्पत्तिः कथं भवति? रेखाचित्रेण प्रदर्शयत।

4. पञ्चकोशानां स्वरूपं वर्णयत। आत्मा एतेभ्यः कोशेभ्यः कथं भिन्नः अस्ति?

5. सूक्ष्मशरीरस्य (लिङ्गशरीरस्य) उत्पत्तिं वर्णयन् तस्य सप्तदश अवयवानां महत्त्वं प्रतिपादयत।

6. 'अपवाद' नाम किम्? प्रपञ्चस्य प्रविलापनप्रक्रिया वेदान्तसारानुसारं का अस्ति?

## Unit - 3

**लघूत्तरीयप्रश्नाः (1×13)**

1. विज्ञानमयकोशः कैः अवयवैः मिलित्वा जायते?

2. मनोमयकोशः कैः निर्मितः?

3. प्राणमयकोशः कतिभिः अवयवैः युक्तः?

4. पञ्चप्राणाः के?

5. 'पञ्चीकरणं' किम्?

6. 'तत्त्वमसि' महावाक्यस्य लक्ष्यार्थः कः?

7. 'तत्त्वमसि' वाक्ये का लक्षणा भवति?

8. वेदान्ते कति लक्षणाः स्वीकृताः?

9. 'जहल्लक्षणा' कुत्र प्रयुज्यते?

10. 'अजहल्लक्षणा' का?

11. 'जहदजहल्लक्षणा' (भागलक्षणा) कुत्र स्वीक्रियते?

12. 'श्रवणं' नाम किम्?

13. 'मननस्य' स्वरूपं किम्?

**टिप्पणी - (6×8)**

1. पञ्चीकरणप्रक्रिया

2. पञ्चप्राणाः (प्राण-अपान-व्यान-उदान-समानाः)

3. पञ्चज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च

4. महावाक्यम् 'तत्त्वमसि'

5. लक्षणात्रयम् (जहत्, अजहत्, जहदजहत् च)

6. भागलक्षणा (जहदजहल्लक्षणा)

7. श्रवण-मनन-निदिध्यासनानि

8. सविकल्पकसमाधिः

**दीर्घोत्तरीयप्रश्नाः (10×6)**

१३. 'तत्त्वमसि' महावाक्यस्य अखण्डार्थबोधाय 'भागलक्षणा' (जहदजहल्लक्षणा) कथं आवश्यकी अस्ति? सविस्तरं व्याख्यात।

१४. 'महावाक्यविचारे' जहल्लक्षणायाः अजहल्लक्षणायाः च अनुपपत्तिं प्रदर्शयत।

१५. आत्मसाक्षात्काराय श्रवण-मनन-निदिध्यासनानां स्वरूपं महत्त्वं च प्रतिपादयत।

१६. सविकल्पकसमाधेः निर्विकल्पकसमाधेः च मध्ये कः भेदः? तयोः लक्षणं लिखत।

१७. निर्विकल्पकसमाधेः अष्टाङ्गानि उपनिषद्-योगशास्त्रानुसारं सविस्तरं वर्णयत।

१८. समाधिमार्गे आगच्छतां चतुर्णां विघ्नानां (लय-विक्षेप-कषाय-रसास्वादानां) स्वरूपं तत्परिहारोपायं च लिखत।

## Unit - 4

**लघूत्तरीयप्रश्नाः (1×13)**

1. 'निदिध्यासनं' नाम किम्?

2. समाधिः कतिविधः?

3. 'सविकल्पक-समाधिः' कः?

4. 'निर्विकल्पक-समाधिः' कः?

5. निर्विकल्पकसमाधेः कति अङ्गानि?

6. समाधेः कति विघ्नाः सन्ति?

7. लयः कः ?

8. विक्षेपः  कः?

9. कषायः कः?

10. रसास्वादः इति कः विघ्नः?

11. 'जीवन्मुक्तः' कः?

12. 'विदेहमुक्तिः' कदा जायते?

13. वेदान्तसारस्य परमं प्रयोजनं किम्?

**टिप्पणी - (6×8)**

1. निर्विकल्पकसमाधिः

2. अष्टाङ्गयोगः (वेदान्तसारपरिप्रेक्ष्ये)

3. समाधिविघ्नः - लयः

4. समाधिविघ्नः - विक्षेपः

5. समाधिविघ्नद्वयम् - कषायः रसास्वादश्च

6. जीवन्मुक्तस्य लक्षणानि

7. प्रारब्धकर्मविचारः

8. विदेहमुक्तिः

**दीर्घोत्तरीयप्रश्नाः (10×7)**

1. 'जीवन्मुक्तस्य' लक्षणं किं? तस्य व्यवहारः समाजं प्रति कीदृशः भवति?

2. जीवन्मुक्तस्य प्रारब्धकर्मणां भोगः कथं जायते? 'विदेहमुक्ति' पर्यन्तं तस्य यात्रां वर्णयत।

3. वेदान्तसारे 'ईश्वर'स्य स्वरूपं किं? सः जगदुपादानकारणं निमित्तकारणं च कथं अस्ति?

4. 'पञ्चप्राण' विचारं कुरुत। एतेषां शरीरे स्थानानि कार्याणि च कानि सन्ति?

5. 'ज्ञानविरोधि भावरूपं यत्किञ्चित्' - इति अज्ञानलक्षणस्य सार्थकतां प्रतिपादयत।

6. स्थूल-सूक्ष्म-कारणशरीराणां परस्परं सम्बन्धं तैः सह सम्बद्धानां जाग्रत-स्वप्न-सुषुप्ति-अवस्थानां च विवेचनं कुरुत।

7. वेदान्तसारस्य उपसंहारे 'परमानन्दप्राप्तिः' इति प्रयोजनं कथं समर्थितं भवति?

**Paper code-UGNYDS601**

**Paer name-न्यायसिद्धान्तमुक्तावली -3**

## Unit 1

**लघूत्तरीयप्रश्नाः (1×10)**

1. पदज्ञानं कस्य करणं भवति?

2. आसत्तिः का अस्ति?

3. 'आकाङ्क्षा' कस्य लक्षणं वर्तते?

4. योग्यतायाः स्वरूपं किमस्ति?

5. वृत्तिः कतिविधा? तासां नामानि लिखत।

6. 'लक्षणा' कतिविधा भवति?

7. शक्यार्थसम्बन्धः क:कथ्यते?

8. शब्दप्रमाणस्य मुख्यं फलं किम्?

9. पदज्ञानं करणं चेत्, तत्र व्यापारः कः?

10. तात्पर्यनिर्णयः कुत्र आवश्यकः?

**टिप्पणी (6×5)**

1. आकाङ्क्षा-योग्यता-आसत्तीनां महत्त्वम्।

2. लक्षणाप्रभेदाः (जहती-अजहती-भागलक्षणा)।

3. पदपदार्थसम्बन्धः (शक्तिः)।

4. शाब्दबोधप्रक्रिया।

5. तात्पर्यज्ञानस्य आवश्यकता।

6. शक्तिग्रहोपायाः

**दीर्घोत्तरीयप्रश्नाः (10×5)**

1. शब्दखण्डानुसारं शब्दप्रमाणस्य निरूपणं कुरुत।

2. आकाङ्क्षा-योग्यता-आसत्तीनां सविस्तरं विवेचनं कार्यम्।

3. शक्ति-लक्षणावृत्त्योः भेदं स्पष्टीकृत्य लक्षणायाः भेदान् लिखत।

4. पदचातुर्विध्यं सोदाहरणेन स्पष्टीकुरुत।

5. न्यायमते पदशक्तिग्रहोपायाः के ?विवृणुत।

## Unit 2

**लघूत्तरीयप्रश्नाः (1×10)**

1. गुणाः कति सन्ति?

2. रूपं कतिविधं भवति?

3. रसस्य आश्रयः कः?

4. गन्धस्य लक्षणं किमस्ति?

5. स्पर्शः कुत्र वर्तते?

6. संख्यायाः लक्षणं लिखत।

7. परिमाणं कतिविधं वर्तते?

8. पृथक्त्वस्य स्वरूपं किम्?

9. संयोगस्य कति भेदाः सन्ति?

10. विभागस्य लक्षणं किमस्ति?

**टिप्पणी (6×5)**

1. मनसोऽणुत्वनिरूपणम्।

2. गुणत्वजातिसिद्धिः।

3. संयोग-विभागयोः वैशिष्ट्यम्।

4. द्वित्व-बहुत्व-संख्याविचारः।

5 रूप-रस-गन्ध-स्पर्शानां भेदाः।

6. सुख-दुःखयोः स्वरूपम्।

**दीर्घोत्तरीयप्रश्नाः (10×5)**

1. गुणानां सविस्तरं लक्षणं कुरुत ।

2. पार्थिवपरमाणुषु पाकजप्रक्रियां न्यायमतेन स्पष्टयत।

3. संयोग-विभागयोः लक्षणं भेदाश्च सप्रमाणं लिखत।

4. बुद्धेः भेदान् मुक्तावल्याः आधारेण स्पष्टयत।

5. संस्कारस्य भेदाः (वेगो-भावना-स्थितिस्थापकः) के सन्ति? विवेचनं कुरुत।

## Unit 3

**लघूत्तरीयप्रश्नाः (1×10)**

1. सामान्यं कतिविधं भवति?

2. 'नित्यमेकमनेकसमवेतं' कस्य लक्षणम्?

3. पर-अपरसामान्ययोः भेदः कः?

4. 'जाति' कस्य पर्यायः अस्ति?

5. विशेषः कुत्र वर्तते?

6. समवायः एकः अस्ति वा अनेकः?

7. अयुतसिद्धपदार्थानां कः सम्बन्धः?

8. विशेषपदार्थस्य किमर्थम् आवश्यकता वर्तते?

9. सामान्यस्य कति भेदाः?

10. समवायस्य स्वरूपं किम्?

**टिप्पणी (6×5)**

1. परं सामान्यम् (सत्ता)।

2. अपरं सामान्यम् (द्रव्यत्वादि)।

3. अयुतसिद्धिसम्बन्धः।

4. अन्त्यविशेषः।

5. सामान्य-विशेषयोः अन्तरम्।

6. जातिबाधकसंग्रहः।

**दीर्घोत्तरीयप्रश्नाः (10×5)**

1. सामान्यपदार्थं लक्षयित्वा तस्य भेदान् सविस्तरं लिखत।
2. विशेषपदार्थस्य दार्शनिकं महत्त्वं मुक्तावल्याः आधारेण वर्णयत।
3. समवायस्य लक्षणं सप्रमाणं सिद्धं कुरुत।
4. संयोग-समवाययोः भेदं स्पष्टीकृत्य समवायस्य नित्यतां साधयत।
5. मुक्तावलीकारमतेन सामान्यादीनां साधर्म्य-वैधर्म्यं प्रतिपादयत।
6. 'नित्यमेकमनेकसमवेतं सामान्यम्' - अस्य वाक्यस्य व्याख्यां कुरुत।

## Unit 4

**लघूत्तरीयप्रश्नाः (1×10)**

1. अभावः कतिविधः भवति?
2. प्रागभावस्य लक्षणं किम्?
3. प्रध्वंसाभावः कः अस्ति?
4. अत्यन्ताभावस्य स्वरूपं किमस्ति?
5. अन्योन्याभावस्य लक्षणं लिखत।
6. संसर्गाभावः कतिविधः?
7. घट-पटयोः भेदः कः अभावः?
8. ग्रन्थकारः ग्रन्थान्ते किं प्रार्थयति?
9. 'अनादिः सान्तः' कः अभावः?

10. 'सादिः अनन्तः' कः अभावः?

**टिप्पणी (6×5)**

1. बुद्धिनिरूपणम्।

2. प्रमा-अप्रमायाः भेदः।

3. अन्यथाख्यातिवादः।

4. न्यायमतेन गुरुमतखण्डनम्।

5. वेदस्य पौरुषेयत्वसिद्धिः।

6.अभावस्य सप्तमपदार्थत्वम्।

**दीर्घोत्तरीयप्रश्नाः (10×5)**

1. अभावपदार्थस्य लक्षणं कृत्वा तस्य भेदान् सविस्तरं विवेचयत।

2. मुक्तावल्याः शब्दखण्डे ईश्वरस्य प्रामाण्यं कथं साधितम्?

3. अन्यथाख्यातिवादं स्पष्टीकृत्य प्रभाकरमतस्य (अख्यातिवादस्य) खण्डनं कुरुत।

4. ग्रन्थसमाप्तौ विश्वनाथपञ्चाननेन कृतं निष्कर्षं वर्णयत।

**PAPER CODE – UGNYDS602**

**PAPER NAME – व्याप्तिपञ्चकम्–2**

## Unit-1

- **लघूत्तरीयप्रश्नाः (1×10)**

1.तत्त्वचिन्तामणिकारः कः?

2.दीधितिकारः कः?

3.मणिकारोक्तं व्याप्तेः द्वितीयलक्षणं किम्?

4.द्वितीयलक्षणे साध्यवदभिन्नत्वे  पदं कुतो निवेशितम्?

5.किं नाम अव्याप्यवृत्तित्त्वम् ?

6.कपिसंयोगी एतद् वृक्षत्वाद् इत्यत्र साध्यतावच्छेदकसम्बन्ध: कः?

7.कपिसंयोगी एतद् वृक्षत्वाद् इत्यत्र हेतुतावच्छेदकसम्बन्ध: कः?

8.प्राचीनमते साध्यवद्भिन्नत्वं कस्य विशेषणम्?

9.नवीनमते द्वितीयलक्षणस्य समासप्रकारक : कः?

10.घटाकाशसंयोगघटतत्वान्यतराभाववान् गगनत्वाद् इत्यत्र सद्हेतुरसद्हेतुर्वा?

- **टिप्पणी (6×7)**

1.तत्त्वचिन्तामणि:

2.मथुरानाथ:

3.व्याप्ते : द्वितीयलक्षणम्

4.द्वितीयलक्षणे प्राचीनमतखण्डनम्

5.साध्याभाववदित्यस्य व्यर्थत्वा पपत्तिः

6.नव्यमते अव्याप्यवृत्तिसाध्यकस्थले दोषवा रणम्

7.द्वितीयलक्षणे यद्वामतम्

- **दीर्घोत्तरीयप्रश्ना (10×5)**

1.मणिकारोक्तं व्याप्तेः द्वितीयलक्षणे प्राच्यनव्यमतयोः वै षम्यं प्रदर्शयत |

2.सदलकृत्यं द्वितीयलक्षणं परिष्कुरुत |

3.संयोगिद्रव्यत्वादित्यत्र नव्यमते अव्याप्तिवारणाप्रकारं प्रदर्शयत |

5.घटाकाशसंयोगघटत्वान्यतरा भाववान् गगनत्वाद् इत्यत्र दोषवारणप्रकारं प्रदर्शयत |

## Unit-2

- **लघूत्तरीयप्रश्नाः (1×10)**

1.व्याप्तिपञ्चकम् कीदृश: ग्रन्थ: वर्तते?

2.अभावस्य लक्षणं किम्?

3.अभावः कतिविध:?

4.प्रागभावस्य लक्षणं किम्?

5.प्रध्वंसभावस्य लक्षणम् किम् ?

6.अत्यन्ताभावस्य लक्षणं किम्?

7.अन्योयाभावस्य लक्षणं किम्?

8.को नाम नित्यसंसर्गाभावः?

9.को नाम जन्यसंसर्गाभावः?

10. घटाकाशसंयोगघटतत्वान्यतराभाववान् गगनत्वाद् इत्यत्र सद्हेतुरसद्हेतुर्वा ?

- **टिप्पणी (6×5)**

1.दीधितिकारः

2.जगदीश :

3.गङ्गेशोपाध्याय :

4.नव्यमते अव्याप्यवृत्तिसाध्यकस्थले दोषवारणमम्

5.द्वितीयलक्षणे यद्वामतम्

- **दीर्घोत्तरीयप्रश्नाः (10×5)**

1.द्वितीयलक्षणस्य नानाधिकरणसाध्यकस्थले दोषवारण प्रकारं प्रदर्शयत |

2.द्वितीयलक्षणस्य पञ्चमलक्षणेन सह पौनरुक्तं प्रदर्श्य खण्डयत्|

3.साध्याभावपदस्य वैयर्थमाशङ्क्य तृतीयलक्षणे खण्डयत |

4.प्रथमलक्षणस्य परिहारबीजं स युक्तिकं निरूपयत |

5.अधिकरणभेदेन अभाव भेदादिति  मतं यथाग्रन्थं प्रतिपादयत |

## Unit3

- **लघूत्तरीयप्रश्नाः (1×10)**

1.मणिकारोक्तं तृतीयलक्षणं किम् ?

2.अन्योन्याभावस्य लक्षणं किम् ?

3.किं नाम प्रतियोगित्वम् ?

4.तृतीयलक्षणे कीदृशः अन्योन्याभावः ग्राह्यः ?

5.किं नाम व्यासज्यवृत्तित्वम् ?

6.नानाधिकरणसाध्यकस्थलं किम् ?

7.किं नाम अव्यासज्यवृत्तित्वम् ?

8.एकाधिकरणकसाध्यकस्थलं किम् ?

9.घटात्यन्तभावस्य प्रतियोगी कः ?

10.भूतले घटाभावः इत्यत्र अनुयोगी कः ?

- **टिप्पणी (6×6)**

1.व्यासज्यवृत्तित्वम्

2.अव्यासज्यवृत्तित्वम्

3.तृतीयलक्षणम्

4.प्रतियोग्यवृत्तित्वम्

5.केवलान्वयित्वम्

6.अव्याप्यवृत्तित्वम्

- **दीर्घोत्तरीयप्रश्नाः (10×5)**

1. मणिकारोक्तं तृतीयलक्षणं ससमन्वयं प्रदर्शयत।

2.तृतीयलक्षणे अन्योन्याभावस्य सार्थक्यं प्रदर्शयत।

3.तृतीयलक्षणस्य समासप्रकारं यथाग्रन्थं विवेचयत।

4.तृतीयलक्षणस्य नानाधिकरणसाध्यकस्थले अव्याप्तिं प्रदर्शयत।

5.तृतीयलक्षणे यद्वामतं सप्रसङ्गं निरूपयत।

## Unit 4

- **लघूत्तरीयप्रश्नाः (1×10)**

1. मणिकारोक्तं चतुर्थलक्षणं किम्?

2.किं नाम साकल्यम्?

3.''पर्वतो वह्निमान् धूमात्'' इत्यत्र साध्यतावच्छेदकसम्बन्धः कः?

4.का नाम अव्याप्तिः?

5.का नाम अतिव्याप्तिः?

6.चतुर्थलक्षणे साकल्य कस्य लक्षणम्?

7.असम्भवस्य लक्षणं किम्?

8.साध्याभाववतः विशेषणं किम्?

9.द्रव्यं सत्त्वादिति सद्हेतुस्थलमसद्हेतुस्थलं वा ?

10.निरवच्छिन्नत्वं नाम किम्?

- **टिप्पणी (6×6)**

1.चतुर्थलक्षणम्

2.चतुर्थलक्षणे साध्याभावपदार्थः

3.साकल्यपदार्थः

4.निरवच्छिन्नत्वपदार्थः

5.सत्तापदार्थः

6.संयोगपदार्थः

- **दीर्घोत्तरीयप्रश्नाः (10×5)**

1.मणिकारोक्तं चतुर्थलक्षणं ससमन्वयं प्रदर्शयत।

2.साकल्यं साध्याभावतो विशेषणम् इति ग्रन्थमनुसृत्य लक्षणस्य परिष्कारः प्रदर्शनीयः।

3.साकल्यस्य साध्याभावविशेषणत्वे दोषम् उद्भाव्य सिद्धान्तं निरूपयत।

4.द्रव्यं सत्त्वादित्यादौ अव्याप्तिं प्रदर्श्य खण्डयत।

5.अव्याप्यवृत्तिसाध्यकस्थले चतुर्थलक्षणस्य समन्वयः सविस्तरं प्रदर्शयत।

## Unit-5

- **लघूत्तरीयप्रश्नाः (1×10)**

1.मणिकारोक्तं पञ्चमलक्षणं किम्?

2.किम् नाम व्यापकत्वम्?

3.किम् नाम व्याप्यत्वम्?

4.पञ्चमलक्षणे साध्यवत्वं केन सम्बन्धेन बोध्यम्?

5.पञ्चमलक्षणस्य केन लक्षणेन सह साम्यं वर्तते?

6.पर्वतो वह्निमान् धुमादित्यत्र हेतुतावच्छेदकसम्बन्ध: कः?

7.को नाम भेदः?

8.एकं केवलान्वयिसाध्यकस्थलं सूचयत?

9.अधिकारभेदेन ___?

10.किं नाम विशेषणत्वम्?

- **टिप्पणी (6×5)**

1.साध्यवदन्यावृत्तित्वम्

2.चलनीयन्यायः

3.अत्यान्ताभाव:

4.साध्यवत्वञ्च साध्यतावच्छेदक सम्बन्धेन बोध्यम्

5.पञ्चमलक्षणस्य केवलान्वयिसाध्यकसत्त्वम्

- **दीर्घोत्तरीयप्रश्नाः (10×5)**

1.मणिकारोक्तं पञ्चमलक्षणं ससमन्वयं प्रदर्शयत |

2.पञ्चमलक्षणे वृत्तित्वासामान्यभावस्य स्वरूपं प्रयोजनञ्च प्रदर्शयत |

3.पञ्चमलक्षणस्य वह्निमान् धूमादित्यत्र अव्याप्ति : कथमिति प्रदर्श्य निवारयत |

4.अव्यावृत्तिसाध्यकस्थले पञ्चमलक्षणस्य समन्वयं प्रतिपादयत |

5." सर्वाण्येव लक्षणानि कैवलान्वय्य व्याप्त्या दूषयति "इति ग्रन्थं विवेचयत |

**PAPER CODE - UGNYDS603**

**PAPER NAME - सिद्धान्तलक्षणम् - 1**

## Unit - 1

**लघूत्तरीयप्रश्नाः (1×12)**

1.सिद्धान्तलक्षणस्य रचयिता कः?

2.'सिद्धान्तलक्षणम्' कस्य ग्रन्थस्य टीका अस्ति?

3.व्याप्तेः सामान्यलक्षणं किम्?

4.जागदीशीमते व्याप्तिः कतिविधा?

5.'लक्षणम्' इति पदस्य कोऽर्थः?

6.अव्याप्तिः का भवति?

7.अतिव्याप्तिः का?

8.असम्भवः कः?

9.प्रतियोगिता कस्य भवति?

10.सिद्धान्तलक्षणे कस्य अभावस्य चर्चा मुख्यतया कृता?

11.व्याप्तिग्रहः कथं भवति?

12.साध्यवदन्यत्वं किम्?

**टिप्पणी - (6×7)**

1. तत्त्वचिन्तामणिः

2. गङ्गेशोपाध्यायः

3. दीधितिकारः

4. सिद्धान्तलक्षणम्

5. जगदीशभट्टाचार्यः

6. असमानाधिकरणान्तदलप्रयोजनम्

7. उपाधिविचारः

**दीर्घोत्तरीयप्रश्नाः (10×6)**

1. पूर्वपक्षव्याप्तेः दूषकताबीजं विस्तरेण विवेचयत।

2. मणिकारोक्तं सिद्धान्तलक्षणं विलिख्य केवलान्वयीस्थले दोषवारणं कुरुत।

3. मणिकारोक्तलक्षणे नञव्यत्यासप्रयोजनं प्रदर्शयत।

4. अत्रोच्यते इत्यादिना विद्यमानस्य सिद्धान्तलक्षणस्य दलसार्थक्यं निरूपयत।

5. अनवच्छेदकत्वानुसरणकल्पः सप्रसङ्गं निरूपणीयः।

6. पर्वतो बह्निमान् धूमादित्यत्र पर्वते महानसियोर्बह्निर्नास्तीत्यभावमादाय अव्याप्तिं प्रदर्श्य निराकुरुत।

## Unit - 2

**लघूत्तरीयप्रश्नाः (1×12)**

1.किन्नाम अवच्छेदकत्वम्?

2.हेतुः कतिविधः?

3.पञ्चलक्षणी कुत्र अस्ति?

4.जगदीशस्य पितुः नाम किम्?

5.व्याप्तिः कस्य सम्बन्धः?

6.अन्वयव्याप्तिः का?

7.व्यतिरेकव्याप्तिः का?

8.उपाधिः कः?

9.सपक्षः कः?

10.विपक्षः कः?

11.पक्षः कः?

12.हेतुः कः?

**टिप्पणी - (6×7)**

1. गदाधरभट्टाचार्यः
2. साध्यवदन्यावृत्तित्वम्
3. पूर्वपक्षव्याप्तेः दोषकता ज्ञेयम्
4. साध्यतावच्छेदकरत्वम्
5. पर्वतो वह्निमान् धूमात् इत्यत्र पर्वते महानसीयो वह्निर्नास्तीत्यभावमादाय दोषोद्भावनम्
6. द्रव्ये संयोगसामान्याभावे मानाभावात्
7. आकाशपदार्थः

**दीर्घोत्तरीयप्रश्नाः (10×6)**

1.सिद्धान्तलक्षणस्य पर्याप्तिघटितकल्पः निरूपणीयः।

2. प्रमेयाश्रयवान् धूमादित्यत्र अव्याप्तिवारणाय साध्यतावच्छेदकेतरत्वं परिष्कुरुत।

3. दण्डिमान् दण्डिसंयोगादित्यत्र अव्याप्तिप्रदर्श्य तन्निवारयत।

4. दण्ड्यादौ साध्ये परम्परासम्बद्धं दण्डत्वादिकमेव साध्यतावच्छेदकमतो नाव्याप्तिः इति दीधितिग्रन्थस्य आशयं स्पष्टीकुरुत।

5. साध्य-साधनभेदेन व्याप्तिग्रहानुमित्योः कार्य्यकारणभावभेदात् इतिपङ्क्तेराशयं विवेचयत।

6. सिद्धान्तलक्षणे हेतुतावच्छेदकावच्छिन्नेति दलस्य प्रयोजनं प्रकाशयत।

## Unit - 3

**लघूत्तरीयप्रश्नाः (1×13)**

1.परामर्शः कः?

2.अनुमितिः का?

3.किन्नाम प्रतियोगितावच्छेदकत्वम्?

4.केवलान्वयी हेतुः कः?

5.केवलव्यतिरेकी हेतुः कः?

6.अन्वयव्यतिरेकी हेतुः कः?

7.व्याप्तिज्ञानस्य प्रतिबन्धकं किम्?

8.प्रतियोग्यसमानाधिकरणाभावः कः?

9.अवच्छेदकता कतिविधा?

10.जगदीशतर्कालङ्कारः कस्य देशस्य निवासी आसीत्?

11.स्वार्थानुमितिः का?

12.परार्थानुमितिः का?

13.को नाम संशयः?

**टिप्पणी - (6×8)**

1. पर्याप्तिः

2. दण्डिमान् दण्डिसंयोगात् इत्यत्र दोषोद्भावनम्

3. विशिष्टं शुद्धान्नातिरित्यते

4. केवलान्वयित्त्वम्

5. अन्वयव्यतिरेकित्त्वम्

6. जातिः

7. निरवच्छिन्नत्वम्

8. अप्रयोजकत्वम्

**दीर्घोत्तरीयप्रश्नाः (10×6)**

1. "इदं द्रव्यं गुणकर्माण्यत्वे सति सत्वात्" इत्यत्र अव्याप्तिमुद्भाव्य निवारयत।

2. सामानाधिकरण्यव्यक्तीनां भेदेऽपि निरूपकतावच्छेदकस्य अधिकरणतावच्छेदकस्य चैक्याद्व्याप्तेरैक्यम् इति दीधितिग्रन्थस्य भावार्थः द्योतनीयः।

3. "एकैव हि सा व्याप्तिः" इति परामर्शीयसिद्धान्तग्रन्थस्य संगतिं प्रदर्शयत।

4.लक्षणघटक-असमानाधिकरणान्तदलस्य प्रयोजनं स्पष्टयत।

5. सिद्धान्तलक्षणस्य कपिसंयोगी एतद्वृक्षत्वादित्यादिसङ्ग्रहायासमानाधिकरणान्तम्

6. नव्यमतेन प्रतियोगिव्यधिकरणपदोपादानप्रयोज नं विवेचयत।

## Unit - 4

लघूत्तरीयप्रश्नाः (1×13)

1. सिद्धान्तलक्षणघटकं प्रथमं 'यत्' पदं किमर्थकम् ?

2. सिद्धान्तलक्षणघटकं द्वितीय 'यत्' पदस्य कोऽर्थः?

3. सिद्धान्तलक्षणघटकं प्रथमं 'तत्' पद किमर्थकम् ?

4. सिद्धान्तलक्षणघटकं द्वितीय 'तत्' पदस्य कोऽर्थः?

5. किं नाम साध्यतावच्छेदकरत्त्वम्?

6. प्रमेयाश्रयवान् धूमात् इत्यत्र साध्यतावच्छेदकं किम्?

7. दण्डिमान् दण्डिसंयोगात् इत्यत्र परम्परासम्बन्धेन साध्यतावच्छेदकं किम्?

8. इदं द्रव्यं गुणकर्माण्यत्वे सति सत्त्वादित्यत्र हेतुः कः?

9. यद्रूपविशिष्टस्य फलं किम् ?

10. किं नाम अव्याप्तिवृत्तित्वम्?

11. सामानाधिकरण्यव्यक्तिनां भेदेभि व्याप्तेः ऐक्यं कथम्?

12. एकम् अव्याप्त्यवृत्तिसाध्यकम् उदाहरत।

13. दीधितिकारमते द्रव्ये संयोगसामान्याभाव भवति न वा?

14. यो यदीय यावद्विशेषाभाववान्…..?

**टिप्पणी - (6×8)**

1. केवलव्यतिरेकित्त्वम्

2. अन्योन्याभावः

3. अत्यन्ताभावः

4. सामानाधिकरण्यम्

5. परामर्शः

6. एकैव हि सा व्याप्तिः

7. पर्वतीय वह्निधूमयोः असन्निकर्षात् तयोः कथं व्याप्तिग्रहः?

8. इदं संयोगीद्रव्यत्वादित्यत्र अव्याप्तिदोषोद्भावनम्

**दीर्घोत्तरीयप्रश्नाः (10×7)**

1.हेत्वधिरणवृत्तितानियामकसम्बन्धविचारं प्रकाशयत।

2.प्रतियोग्यसामानाधिकरण्यपदार्थविचारं वर्णयत।

3. अत्यन्तपदोपादानप्रयोजनं विवृणोत।

4. संसर्गाभावप्रवेशविचारं निरूपयत।

5. प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यधिकरणत्वविचारं विवेचनीयम्।

6.प्रतियोगितावच्छेदकावच्छिन्नाधिकरणस्वरूपविचारं प्रकाशयत।

7. हेत्वधिकरणस्य साध्याधिकरणस्य च संसर्गविचारं विवेचयत।